ति एवं वर्ण्यमानः पर्वतः स्वयमुपमानभावेन गृहमेधिन उक्तबोधनसमर्थान्क
र्तुं क्षमते ॥ यथायं पर्वतः समागतं रविं शिरसा संभावयति ॥ एवं गृहमेधी स
मागतं संतं उचितपूजया संभावयेदिति ॥ अतः संभावितबोधनसंबंधइति ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भेदप्राधान्येऽपमानादुपमेयस्याधिक्येविपर्ययेव्यतिरेकः॥१

व्यतिरेकोविशेषश्चेदुपमानोपमेययोः॥शैक्षाइवोन्नताःसंतःकिंनुयक्षतिको
मलाः॥१२२॥अयमुपमेयाधिक्यपर्यवसायीव्यतिरेकः॥यथावा॥पल्लव
तःकल्पतरोरेषविशेषःकरस्यतेवीर॥भूषयतिकर्णमेकःपरस्तुकर्णंतिर
स्कुरुते॥१२३॥तन्न्यूनत्वपर्यवसायीयथा॥रक्तस्त्वंनवपल्लवैरहमपि
श्लाघ्यैःत्रियागुणैस्त्वामायांतिशिखिनीमुखाःस्मरधनुर्मुक्तास्तथामामपि॥
कांतापादतलाहतिस्तवमुदंतद्दुःखमाप्यावयोःसर्वंतुल्यमशोकके वलमहं
याचेसशोकःकृतः॥१२४॥अनुभयपर्यवसायीयथा॥दृढतरनिबद्धमु
ष्टेःकोशनिषण्णस्यसहजमलिनस्य॥कृतंकृपणस्यकृपाणस्यचकेवलमा

या

30

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न

कारतोभेदः॥११५॥सहोक्तिःसहभावश्चेद्भासतेजैरंजनः॥दिगंतमगमत्तस्यकी
र्त्तिःप्रसर्पिभिःसह॥११६॥यथावा॥छायासंश्रयतेतलंविटपिनांश्रांतैपांथैःवर
समंमूलंयातिसरोजलस्यजलितांग्लानेवमीनैःसह॥भाचार्मेस्यहिमांशुदी
धितिरपस्तप्तेवलोकेःसमंनिद्रागर्भगृहंसहप्रविशतिक्रांतेकांताजनेः॥
११७॥जनरंजनइत्युक्तेरनेनसार्द्धंविहरंबुराशेरिस्यादौनसहोक्तिरलंका
रः॥विनोक्तिश्चेद्विनाकिंचित्प्रस्तुतंहीनमुच्यते॥विद्याहृद्यापिसावद्याविना
विनयसंपदं॥११८॥यथावा॥यश्चरामंनपश्येत्तुयंचरामोनपश्यति॥
निंदितःसप्रवेष्टुंकेस्वात्माप्यंविगर्हते॥११९॥भचरामदर्शनंविनाद्री

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नत्वं विना शब्दमंतरेण दर्शितं ॥ तच्चेत् किंचिद्विनारम्यं विनोक्तिः सापि कथ्यते ॥ विना खड्गै
र्विभात्येषा राजेंद्र भवतः सभा ॥ १२० ॥ यथा वा ॥ आविर्भूते शशिनि नितमसा मुच्य
माने वराचिर्नेत्रस्यार्चिर्द्युतभुजइव छन्नभूयिष्ठधूमा ॥ [illegible] नांतर्वरतनुरियं मोहे
लक्ष्यते मुक्तकल्पा गंगारोधःपतनकलुषा गह्वरीव प्रसादं ॥ १२१ ॥ अत्र तमः
प्रभृतिना विना निशादीनां रम्यत्वं विना शब्दमंतरेण दर्शितं ॥ समासोक्तिः प
रिस्फूर्तिः प्रस्तुते प्रस्तुतस्य चेत् ॥ अयमेत्रीमुखं पश्य रक्तं चुंबति चंद्रमाः ॥ १२२ ॥
यत्र प्रस्तुतवृत्तांते वर्ण्यमाने विशेषणसाम्यात् प्रस्तुतवृत्तांतस्यापि परिस्फूर्ति
स्तत्र समासोक्तिरलंकारः ॥ समासेन संक्षेपेण प्रस्तुताप्रस्तुतयोर्वचनात् ॥ उ

वृत्तांत २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दाहरणमयमेंद्रीति ॥ अत्र हि चंद्रस्य त्राचीप्रारंभ सं। बंधलक्षणेउपमेयेवर्ण्यमाने
मुखशब्दस्य प्रारंभवदनसाधारण्यादुक्तशब्दस्यारुणकामुकसाधारण्याच्चुंबती
त्यस्य प्रस्तुतार्थसंबंधमात्रेपार्यवसंस्याशक्त्यार्थांतरसाधारण्याच्चंद्रमसः श
ब्दगतपुंल्लिंगेत्वेनऐंद्रीशब्दगतस्त्रीलिंगेन तत्पतिपाद्येंद्रीसंबंधित्वेन चोपस्म
तापरवनितासक्तपुरुषवृत्तांतः प्रतीयते ॥ यथावा ॥ व्यावल्गत्कुचभारमाकु
लकचं व्याकोलहारावलीचेलत्कुंडलशोभिगंडयुगलं त्रस्तेदिवक्त्रांबुजं ॥ अ
प्यदत्तकरप्रहारमधिकश्वासंरसादेतयायस्मात्कंठमुपादरंसुभगयासंश्रो क२
यसेतत्कृती ॥ १२५ ॥ अथ कंदुकवृत्तांते वर्ण्यमाने व्यावल्गत्कुचभारमित्यादि

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्रियाविशेषणसाम्याद्विपरीतरतौ तासक्तनायकवृत्तांतः प्रतीयते ॥ पूर्वत्र विशेषणानि
श्लिष्टानि ॥ इह साधारणानीति भेदः ॥ सारूप्यादपि समासोक्तिर्दृश्यते ॥ यथा वा ॥ पुरा
यत्र स्रोतःपुलिनमधुना तत्र सरितां विपर्यासं यातो घनविरलभावः क्षितिरुहां ॥ अ
हो दृष्टं कालादपरमिव मन्येवनमिदं निवेशाः शैलेशोत्तमांतदिदमिति बुद्धिं दृढयति
॥ १२४ ॥ अत्र वनवर्णने प्रस्तुते तत्सारूप्यात् कुटुंबिषु धनसंतानादिसमध्यस
न्निविपर्यासं प्राप्तस्य तत्समाश्रयस्य ग्रामनगरादेर्वृत्तांतः प्रतीयते अत्र च विशेष
स्य२ णसाम्यात्सारूप्याद्वा यदप्रस्तुतवृत्तांतेन प्रस्तुतं तत्र प्रस्तुते विशेषे तत्समारोपा
र्थं सर्वथैव अप्रस्तुतान्वयिनः कविसंरंभगोचरत्वायोगात् ॥ ततश्च समासोक्ता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वपि स्तुतव्यवहारसमारोपश्चाद्भुताहेतुः॥ नतु रूपकइव प्रस्तुते अप्रस्तुतसमारो
पोपपत्तिः॥ मुखं चंद्र इत्यत्र मुखे चंद्रत्वारोपहेतुर्मुखेन समभिव्याहारवदुक्तश्चुंब
ति चंद्रमा इत्यादिसमासोक्त्युदाहरणे चंद्रादेर्जारत्वाद्यापरो हेतोस्तद्वाचकपद
समभिव्याहारस्यासंभवात्॥ निरीक्ष्य विघुन्नयनैः पयोदो मुखं निशायामभिसा
रिकायाः॥ धारानिपातैः सह किन्तु चांतुश्चंद्रो घनैः सार्त्ततरं रसेत्यत्रैकावृत्तिरू
पकोदाहरणे प्रस्तुते अप्रस्तुतरूपसमारोपमात्रकस्यापभावात्॥ अत्र विघुन्नयने
रित्यत्र निरीक्षणानुगुण्यादुत्तरपदार्थप्रधानमपरव्यं सकादिसमासव्यवस्थि
तौ उत्तरपदार्थभूतनयनान्वयानुरोधयोदेऽनुक्तमपि द्वयोः पुरुषत्वरूपणं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गम्यमुपगम्यते ॥ नचेह तथा निरीक्षणवत्त्वं व्यागतेकिमिति वेपत एष सिंधुरिति श्लो
के सेतुकृत्यादिवच्चाप्रस्तुतासाधारणवृत्तांतउपात्तोस्ति ॥ नापि श्लिष्टसाधारणा
दिविशेषणसमर्पितयोः प्रस्तुताप्रस्तुतवृत्तांतयोरप्रस्तुतवृत्तांतस्य विघ्नो
यनवर्त्मयान्यमस्ति ॥ येनतदनुरोधाच्चं सेतुमंथनवदित्यत्रैवानुक्तमपि प्रस्तुते
प्रस्तुतरूपसमारोपमभ्युपगच्छेम ॥ तस्माद्विशेषणसमर्पिताप्रस्तुतव्यवहारसमारो
पमात्रमिहचारुताहेतुः ॥ यद्यपि प्रस्तुताप्रस्तुतवृत्तांतयोरिह श्लिष्टसाधारणवि
शेषणसमर्पितयोरिव विशेषणेवसाक्षादन्वयादस्तिसमर्थ्यान्यं तथाप्य
प्रस्तुतवृत्तांतान्वयानुरोधान्न प्रस्तुते प्रस्तुतरूपसमारोपांगीकार्यः ॥ तथाहि ॥

श्लिष्टपदोपात्तविशेषणपो २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्य २ वृत्तांत २

यथा प्रस्तुत विशेषणैः प्रस्तुत वृत्तांतस्यान्वययोग्यता तथैव प्रस्तुते पि रौद्रोदीना स्तिप्र
स्तुत वृत्तांतस्यान्वययोग्यता ॥ एवं च समप्रधानयोः प्रस्तुताप्रस्तुतयोर्न्यतर २
स्याप्रस्यमारोपे भ्युपगंतव्य श्च तएव प्रस्तुते प्रस्तुत वृत्तांत स्यारोपश्चास्ता
हेतुरूप रिति युक्तं ॥ नन्वेवं सति विशेषणसाम्यादप्रस्तुतस्य गम्यत्वे समासोक्तिः ॥
विशेषणानां साम्येन यत्र प्रकृतवर्त्तिनां ॥ न प्रस्तुतस्य गम्यत्वं सा समासोक्ति
रिष्यत इत्यादीनि प्राचीनानां समासोक्ति लक्षणानि न संगच्छेरन् ॥ प्रस्तुते
धा २ श्लिष्ट सौरणादि रूप विशेषणसमर्पितानुराग पूर्वक वदन चुंबनाद्य प्रस्तु
त वृत्तांत समारोपमात्रस्य चास्ताहेतुत्वाभ्युपगमे न विशेषणसाम्यं कृतकामु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

काद्यप्रस्तुतधर्मिव्यंजनापेक्षणादिति चेत्॥ उच्यते॥ स्वरूपतोऽप्रस्तुतवृत्तांतस्या
रोपोनचास्तीहेतुः॥ किंचाप्रस्तुतकामुकादिसंबंधित्वेनावगम्यमानस्यतस्यारोपः
तथाप्रस्तुतस्यैवरसानुगुणत्वात्॥ नचतावदवगमनेविशेषणपदानांसामर्थ्यमस्ति॥
अतःश्लेषादिमहिम्नाविशेषणपदैःस्वरूपतासमर्पितेनवदनाचुंबनादिनातत्सं
बंधिनिकामुकादौअभिव्यक्तेपुनस्तदीयेत्यानुसंधानंतत्रभवतिस्वरूपतोऽस्येन
राजाद्यादिनातत्संबंधिनिराजादौस्मारितेपुनरश्वादौतदीयेत्यनुसंधानमितिवि
शेषसाम्येनवाच्योपस्कारकस्याप्रस्तुतव्यंजनस्यास्त्यपेक्षा॥ अतएवश्लिष्टविशे
षणस्याचारणाविशेषणोर्मेप्रस्तुतव्यवहारसमारोपइत्येवप्राचीनानांप्रवादःकंठ

पा च्य

य ३

वृत्ति

ण २

या भि व २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

केयावत्वात्कुचभारत्वादिविशिष्टवनितासेव्यत्वस्यकामुकसंबंधिन्येवसमारोप
णीयत्वात्॥स्वरूपतःकेतुकेपितस्यसत्वेनासमारोपणीयत्वात्॥किंचसारूप्य
निबंधिन्येवनोपादानतायांसमासोक्तौअप्रस्तुतवृत्तांतस्योपस्तुतवृत्तांतरूपेणेव
गम्यतेतिनरूपेणतत्रसमारोपेसिद्धेअन्यत्रापितथैवयुक्तमितियुक्तमेवप्रा
चीनानांलक्षणंविचारणीयं॥अत्रकारणपरिकरःसाभिप्रायविशेषणं॥सुधांशु
कलितोत्तंसस्तापंहरतुवःशिवः॥१२५॥अत्रसुधांशुकलितोत्तंसइतिविशेष
णंतापहरणसामर्थ्याभिप्रायंगमं॥यथावा॥तवप्रसोत्कुसुमायुधोपिसहायदार
मेकंमधुमेवलब्ध्वा॥कुर्याहरस्यापिपिनाकपाणेर्धैर्यच्युतिंकेममधन्विनो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्ये ॥ १२९ ॥ अत्रापि नार्केपाणेरितिहरस्य विशेषणं ॥ कुसुमायुधस्यार्थत्वमाह सैम
र्थविशेषणं सारासारायुध [illegible] त्वाभिप्रायगर्भं ॥ यथावा ॥ सर्वाशुचिनिधानस्य क
तघ्नस्य विनाशिनः ॥ शरीरकस्यापि कृते मूढाः पापानि कुर्वते ॥ १२० ॥ अत्र शरीरवि
शेषणानि तस्य हेयत्वेनासंरक्षणीयत्वाभिप्रायगर्भाणि ॥ यथावा ॥ व्यासेनैकतया स्य
स्थितं श्रुतिगणं जन्मीनवल्मीकतो नाभो नाभवमच्युतस्य सुमहद्भाष्यं न चाभाषितं ॥ षं ५
चित्रार्थेन रहस्यमामचकथं सुत्राणिना संगुरुदेवचरुणवृंदवर्णनमहं कर्तुं
कथं शक्नुयां ॥ १२१ ॥ अत्र श्रुतिगणं न व्यास्यन्नित्यादीनि स्वस्मिन् व्यासाधस्याधा र
यारणकार्यकारणप्रतिषेधमुखेन नाहं व्यासइत्याद्यभिप्रायगर्भाणि ॥ अत्रायो

प० दाहरणयोरेकैकं विशेषणं॥ समनंतरदाहरणयोः त्रयेकं बहूनि विशेषणानि॥ तत्रापि प्र
थमोदाहरणे सर्वाणि विशेषणान्येकाभिप्रायगर्भाणि पदार्थरूपाणि च॥ द्वितीयो
दाहरणे भिन्नभिन्नाभिप्रायगर्भाणि वाक्यार्थरूपाणि चेति भेदः॥ एतेषु व्यंग्य
र्थसद्भावे पि न ध्वनिव्यपदेशः॥ शिवस्य तापहरणे मनुष्यस्य कैमुतिकन्यायेन स
र्वं यन्निचेयं मंजकलेशरीरस्य रक्षणार्थं पापाचरणे मूढत्वेन वर्णनीयराजगु
ण कथनात्मत्वे चवाक्य एवोपस्कारकत्वात्॥ अत एव व्यंग्यार्थस्य वाच्यपरिकरत्वात् परिकर इति नामस्यालंकारस्य॥ केचित्तु निष्प्रयोजनविशेषणोपादाने
अपुष्टार्थपदोषस्योक्तत्वात् सप्रयोजनत्वं विशेषणस्य दोषाभावमात्रेन कथ्य

परिकरस्योपपत्तेः ४

श्रीरत्नेकारः॥ एकनिष्ठतादृशानेकविशेषणोपन्यासः परंवैचित्र्यविशेषात्परिकरइ
त्यलंकारमध्येपरिगणितइत्याहुः॥ वस्तुतस्त्वनेकविशेषणोपन्यासएवपरिकरइति न
नियमः॥ श्लेषयमकादिषुयुक्तार्थत्वदोषाभावेऽनेकत्रैकस्यांविशेषणस्यसामिप्रा पि०
यस्यविन्यासेविच्छित्तिविशेषसद्भावेपरिकरालंकारोपपत्तेः॥ अतियजेतानिजांपदिदेव त्रो४
तामुपयतश्चवतेजुत्वषतेप्यघं॥ क्षितिभृतेवसेदेवतकरवपंचनवतानवताकिमहि
कुहा॥ अत्रहिपुरुहूतपरोघुक्तानंदादीनप्रति भगवतः कृष्णस्यवाक्यंगोवर्धनोगिरिरे स्म४
वास्माकंरक्षकत्वेदैवतमितिसएवपूजनीयः॥ नत्वरक्षकःपुरुहूतइत्येवंपरंवनुयत
तिगोवर्धनगिरेविशेषणंकाननंत्वान्निर्झरादिमत्त्वंपुष्पमूलफलत्यागादि जला=२
भिरारण्यकानामस्मद्गवानांगवांचायमेवरक्षकइत्यभिप्रायगर्भं॥ एवमेत्रैसामि

प्रस्माक पथ्रो ६ कस्यापि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल

प्रायेकं विशेषण विन्यासस्यापि विशिष्टि विशेषुवशादलंकारसिद्धावन्यत्रापि सुचांशु
वश्यं २ कलितोत्तंसइत्यादौ तस्यात्मलाभो न निवार्यते ॥ अपिच ॥ एक एवपदार्थ हेतुकं
काव्यलिंग मलंकार इति सर्वसंमतं ॥ तद्वदेकस्यां विशेषणस्य साभिप्रायस्या पि २
वोकारत्वं युक्तमेव ॥ १२९ ॥ साभिप्राये विशेष्ये तु भवेत्पदिकरांकुरः ॥ चतुर्णां
पुरुषार्थानां दाता देवश्चतुर्भुजः ॥ १३० ॥ अत्र चतुर्भुज इति विशेष्यं पुरुषार्थाश्चतु
र्दानसामर्थ्याभिप्रायगर्भं ॥ यथा वा ॥ फणींद्रस्तेगुणान्वक्तुं तिरिवतुंहेहयां
धिपः ॥ इत्यमारवंडलः रात्तः कोहमेषकृतेगुणाः ॥ १३१ ॥ फणींद्र इत्यादि वि
ष्य शेषपदानि सहस्यमुखत्वाद्यभिप्रायगर्भाणि ॥ नानार्थसंश्रयं श्लेषो व
र्ण्यवर्ण्योपमयास्पदः ॥ सर्वदो माधवः पापात्स्वयोगंगामभवत् ॥ १३२ ॥ अ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हरिहरयोः=४ राघिरं=२ ×अप्रकृतानेकविषयः॥२

ह०२

ब्जेनस्वमुखंतुल्यं रिणाहितशीक्तिना॥उच्चरेस्सरिकीत्कल्लः शिशुभेवाहिनीपतिः समुद्रः १८
॥१३३॥अनेकार्थशब्दविन्यासः श्लेषः॥सचद्विविधः॥प्रकृतानेकविषयः॥
प्रकृताप्रकृतानेकविषयश्च॥सर्वदेत्यादिनाक्रमोदाहरणानि॥तत्रसर्वदा पो३
थवइतिस्तोतव्यत्वेनप्रकृतयोर्द्वयोः कीर्त्तनंप्रकृतश्लेषः॥वाहिनीपतिः रो
नापतिः समुद्रश्चतत्रसमितोशास्त्रेषहारोत्पतद्रुधिरस्यरोनापतेरेववर्णनंप्र
कृतंइतिकृत्वाप्रकृतश्लेषः॥यथावा॥त्रातः काकोदरोयेनद्रोग्धापिकरुणा
त्मना॥पतनामारणख्यातेः समेस्तुरारणंप्रभुः॥१३४॥नीतानामाकुलीभा
वंखुब्धेभ्यरिशिखीमुखे॥सद्योवनवृक्षानांकमलानांत्वदीक्षणे॥१३५॥ हरिणानां२
नस्पष्टदयमारूढः कांतिमारस्तमंडलः॥राजाहरतिलोकस्य हृदयंमदुषिः
न२ ×अलंकमलमलं अंशं इत्तयोरुपमानमात्रचेनाप्रकृ
तयोः कीर्त्तनमिसप्रकृतश्लेषः॥४६

भ्रमरैः२=

36

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

करैः ॥ प्रथमत्राद्ये स्तोतव्यस्तोतव्यत्वेन प्रकृतयोरामकृष्णयोः श्लेषः ॥ द्वितीये उप
मानत्वेनाप्रकृतयोः पद्महरिणयोः श्लेषः ॥ तृतीये राज्ञि वर्णनप्रस्तावे प्रकृतस्य
प्रत्ययोदितचुंबस्य प्रकृतस्य नवाभिषिक्तस्य नृपतेश्च श्लेषः ॥ यदत्र प्रकृ
ताप्रकृतश्लेषोदाहरणे शब्दशक्तिमूलध्वनिभिः संतिप्राचः ॥ तत्प्रकृतार्थे प्रे
ताभिधानमूलकस्योपमादेरलंकारस्य व्यंग्यत्वाभिप्रायं ॥ अप्रकृतार्थस्यापि
शक्त्याप्रतिपाद्यस्याभिधेयत्वावश्यंभावेन वस्त्वनपेक्षणीत्वं ॥ यद्यपि प्रकृ
तार्थे प्रकरणबलात् झटिति बुद्धिस्थे सत्येव पश्चान्नपतितं प्रोच्चघनादिवा
चिनां राजकरादिपदानामन्योन्यसंनिधानबलात्तद्विषयशक्त्यंतरोन्मेषपू
र्वकं प्रकृतार्थः स्फुरन्नेतावतात्स्य व्यंग्यत्वं ॥ शक्त्याप्रतिपाद्यमानेनैव सर्वथे

म० ९

व्यंजना=५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

=एकत्रपरिणताःतिर्यक्दंतप्रहा= =दंतक्षतंनखक्षतंक्रमेणज्ञेयं=३
=रिणोन्यत्रक्रिणीकृताः=३

नव्य
यमतिर

वयस्त्यपेक्षणात्पर्यवसितेप्रकृतार्थाभिधानेपश्चात्स्फुरतिचेत्कामंगूढःश्लेषोभवतु॥भ
स्तिह्यन्यत्रापिगूढश्लेषः॥यथा॥जैंजरठाःप्रकामगुर्वीरल्पुविलंबिपयोधरोपरुद्धः॥
सततमसुमतामगम्यरूपाःपरिणतदिक्करिकास्तटीर्बिभर्त्ति॥१८७॥मंदमग्निमेर्यमो
पलादशितश्चपृथुचाभवत्तमः॥दृष्टयास्तिमिरजंशिषेविरदोषमोषधिपतेरसौन्नि
धौ॥१८८॥अत्रसमासोक्त्युदाहरणयोःप्राकारणिकेऽर्थेप्रकरणवशात्सादितिबु
द्धिस्थेविशेषसाम्यात्रूपकृतोपिवृद्धवेश्यावृत्तांतादिःप्रतीयते॥तत्रसमोक्तिः सो४
रंगश्लेषःइतिसर्वेषामभिमतएवमन्यपि॥गूढश्लेषेघनिबुद्धिर्नकार्या॥यथा॥
रम्याइतिप्रासवतीहिरापरागविविक्ताइतिवर्द्धयंतीः॥यस्यामसेवंतनमूद्धलीकास
मंवधूभिर्वलनीर्युवानः॥१८९॥अत्रद्वितीयांतविशेषणसमर्पितार्थांतराणांनरा

पताका२ मेघा३ दि२

37

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वसामर्थ्यनवयूमिरन्वयः॥विभक्तिभेदात्॥नचविभक्तिभेदेपितद्न्वयाक्षेपकं
सामर्थ्यमिहनिबंधुमस्तियतः॥एतस्मिन्नपिकपयःस्त्रियंवहंत्यःसंक्षोभंपवन
तुवाजवेननीताः॥वाल्मीकेररहितरामलक्ष्मणानांसाधर्म्यंदेयतिगिरांमहास
रस्यः॥१२॥इत्यत्रेवाक्षिप्तश्लेषोभवेत्॥सममित्येतत्तु क्रियाविशेषणेसु
हार्थत्वेनाप्युपपन्नंवस्तुश्लिष्टविशेषणार्थान्वयात्प्राक्प्रागप्रतीतंसंबंध्यं
नालंबते॥तस्मादर्थसौंदर्यबलादेवतद्न्वयानुसंधानमितिगूढश्लेषः॥तद्
नुतद्वलादेवसमशब्दस्यसामर्थ्याकर्षेचकल्पनमितिवाच्यस्यैवोपमालंका
रस्यांगमयंनश्लेषइत्यलंप्रपंचेन॥तस्मात्सिद्धंश्लेषद्वैविध्यं॥एवंचश्ले

म्या ४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परस्परं विलक्षणं ४२

षःप्रकारांतरेणापि द्विविधः संपन्नः॥ उदाहरणेषु जाकीलालवाहिनी इत्यादिशब्दे
षु पदभंगमनपेक्ष्यनानार्थक्रोडीकारादभंगश्लेषः॥ सर्वदोमाधवः योगांगहरि
णाहितशक्तिनेत्यादिपदेषु परस्परविलक्षणं पदभंगमपेक्ष्यनानार्थक्रोडीकृ
तादसभंगश्लेषइतितत्रसभंगश्लेषः शब्दालंकारः॥ असभंगश्लेषस्तु अर्थाल
कारइतिकेचित्॥ उभयमपि शब्दालंकारइत्यन्ये॥ उभयमपि अर्थालंकारइतिस्वा
पि ४ कारइतिकेचित्॥ उभयमपि शब्दालंकारइत्यन्ये॥ उभयमपि अर्थालंकारइतिस्वा
भिप्रायः॥ एतद्विवेचनं तु चित्रमीमांसायां द्रष्टव्यं॥ अप्रस्तुतप्रशंसास्यात्सा
यत्रप्रस्तुताश्रया॥ एकः कृतीराकुंतेषु योन्यं राकान्नयाचते॥ १४॥ यत्रो
प्रस्तुतवृत्तांतवर्णनं प्रस्तुतावगतिपर्यवसायि॥ तत्राप्रस्तुतप्रशंसा सालंकारः॥

38

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कार्यकारणभावेपिकार्यात्कारणस्यकारणाद्वा कार्यस्यावगतौद्वैविध्यं ४३

अप्रस्तुतवृत्तांतवर्णनेनप्रस्तुतावगतिश्चप्रस्तुताप्रस्तुतयोःसंबंधेसतिभवति॥
संबंधश्चसारूप्यंसामान्यविशेषभावःकार्यकारणभावोवासंभवति॥तत्रसामा
न्यविशेषभावेसामान्याद्विशेषस्यविशेषाद्वासामान्यस्यावगतौद्वैविध्यंसारू
प्येत्येकोभेदइतिअस्याःपंचप्रकाराः॥यथाहुः॥कार्येनिमित्तेसामान्येविशेषे
प्रस्तुतेसति॥तदन्यस्यवचस्तुल्यतुल्यस्येतिचपंचधाइतितत्रसारूप्यनिब
न्धनाप्रस्तुतप्रशंसोदाहरणंएकःकृतीति॥अत्रप्रस्तुतस्यचातकस्यप्रशंसाप्रशं ना३
सनीयत्वेनप्रस्तुतेतत्स्वरूपेक्षुद्रेभ्योयाचनोनिवृत्तमानिनिपर्यवस्यति॥यथा
वा॥आबद्धकृत्रिमसटाजटिलांसभित्तिरारोपितोमृगपतेःपदवीयदिश्वा॥

४०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मत्तेभकुंभतटपाटनलंपटस्यनादंकरिष्यतिकथंहरिणाधिपस्य॥१४॥अचश्मु
नकस्यनिंदानिंदनीयत्वेप्रस्तुतेतत्स्वरूपेकृत्रिमवेषव्यवहारिमात्रेणविद्वां
नभिनयतिवैचर्म्यपर्यवस्यति॥यथावा॥अंतःछिद्राणिभूयांसिकंटकाव
हवोबहिः॥कथंकमलनालस्यमाभूवन्भंगुरागुणाः॥१५॥अचकमलना
लदृष्टांतेकीर्त्तनं॥तत्स्वरूपेबहिःस्वलेषुजागरूकत्वात्पुत्रादिभिरंतःकल
हंकुर्वाणेषुरूपपर्यवस्यति॥एवंचलक्ष्यलक्षणयोःत्रशंसाशब्दःस्तुनिंदास्वरू
पाख्यानसाधारणकीर्त्तनमात्रपरोदृष्टव्यः॥सामान्यवैबाधनायथा॥वि
चायवैरंसामर्षनरोरोषउदासते॥प्रक्षिप्योद॰॰चिषंकक्षेशेरतेतेभिमा

नर
वैधेये-३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रतं॥१४५॥ अत्र प्रागेव सामर्षे शिशुपाले रुक्मिणीहरणादिना वैरं दृढीकृतवता
कृष्णेन तस्मिन्नुदासितमयुक्तमिति वक्तव्ये। अर्थे प्रस्तुते तस्यायनार्थं सामान्यम
भिहितं॥ यथा वा सौहार्द्दं स्वर्णरेखाणामुच्चावचाभेदाजुषां॥ परोक्षमपि कोपास्तिपरि
क्षीणकषोपलः॥१४६॥ अत्र यदि त्वं प्रत्यक्षरवपरोक्षेपि मम हितमाचरसि तदा
त्वमुत्तमः सुहृदिति विशेषवक्तव्यत्वेन प्रस्तुते सामान्यमभिहितं॥ विशेषनिबं
धनायथा॥ नं काधिरोपितमृगश्चंद्रमा मृगलांछनः॥ केसरीनिसुरक्षितमृग
यूथोमृगाधिपः॥१४७॥ अत्र कृष्णं प्रति बलभद्रवाक्यमार्द्धवरूषणपरे पूर्व
स्तावानुसारेण क्रूरएव व्याख्यादिभाग्भवति नतु मदुरिति सामान्ये वक्तव्ये त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

या स्यायमार्थमप्रस्तुतो विशेषो भिहितः ॥ एवं बृहत्कथादिषु सामान्यतः कंचिदर्थमप्रस्तु
त्यतद्विकरणार्थमप्रस्तुतकथाविशेषोदाहरणमुपयमेवाप्रस्तुतप्रशंसा द्रष्टव्या ॥
कारणनिबंधनाय या ॥ हृतसारमिवेदुमंडलं दमयंतीवदनाय वेधसा ॥ कृतमध्य
बिलं विलोक्यते यतगंभीरस्वनीस्वनीत्रिम ॥ १४६ ॥ अत्रार्थकरणिकेंदुमंडल
गततयोत्प्रेक्ष्यमाणेन दमयंतीवदननिर्माणार्थसारांशहरणेन तत्कार्यरूपो वर्ण
नीयतया प्रस्तुतो दमयंतीवदनगतालोकोत्तरसौंदर्यविशेषः प्रतीयते ॥ यथा वा ॥
मदीये वरदराजस्तवे ॥ आश्रित्यन्नूनममृतद्युतयः पदं ते देहक्षयोपनतदिव्यपदा
भिमुख्याः ॥ लावण्यपुण्यनिचयं सुहृदिच्छदास्ये विन्यस्य यांति मिहिरं प्रतिमास

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भिन्नाः ॥१४७॥ अथाप्राकारणिकचंद्रतेकैतयोस्ते स्यमाणेन लावण्यपुण्यनिचयो
पन्यासेनकारणेनतत्कार्यमनंतकोटिचंद्रलावण्यशालित्वमनन्यमुखसाधारणं भ
गवन्मुखेवर्णनीयतयाप्रस्तुतंप्रतीयते ॥ तथाहि ॥ चंद्रस्तावन्नवोनवोभवतिजा
यमानइतिमंत्रलिंगाद्द्विक्षयाभ्यामभेदपिभेदाध्यवसायाद्द्वाषतिमासंभिन्नस्ये
नवर्णितः ॥ तेनातीताश्चंद्राअनंतकोट्यइतिलब्धं ॥ कालस्यानादित्वात्सर्वे
षांचतेषामाकाशेश्रयणंशेषमहिम्नाभगवच्चरणसमाश्रयणत्वेनाध्यवसि
तं ॥ भगवच्चरणंप्रपन्नानांचदेहक्षयोपस्थितोपरमपदप्राप्तिमुखंतदानी
मेवस्वसुहृद्भिस्वकीयसुकृतस्तोमनिवेशनंततःसूर्यमंडलप्राप्तिश्चैतत्सर्वंश्रुति

समा

स्ये

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सिद्धमिति तदनुरोधेन तेषां देहक्षयकालस्यामावास्यारूपस्योपस्थितौ सूर्यमंडल
नि २ प्राप्तेः प्राक् प्रत्यक्षसिद्धपुण्यचेतनैरुपितस्य लावण्यस्य ग्रहणं निर्वृत्तीकृत्य तस्य च
स्व ३ इत्यादृश्यरूपोपचरितत्वमोहार्द्धवति भगवन्मुखे सैन्येन मुच्छ्रेसितं ॥ यद्यपि सुह
स्व ४ द्धुत्वेतावत्पुण्यसंक्रमणं भवति ॥ तथापि च सुहृदित्येकवचनेन भगवन्मुखमेव
चंद्राणां सुहृद्भूतं नमुखांतराणि चंद्रसादृश्यगंधस्यापि नास्यदानीं भगवन्मु
खस्यंतरमुखस्योपव्यतिरेकोपि व्यंजितः ॥ ततश्च तासु मन्नेव सर्वेषां चंद्राणां स्वस्व
न्य २ यावल्लावण्यपुण्यविलासनोत्प्रेक्षणेनुभाग्वर्णितः ॥ वस्तुतोर्थः स्पष्टमेव प्रतीय
ते ॥ यद्यपि प्रस्तुतौ सूर्यमंडलप्राप्यनंतरमेव सुह

घ १=

मि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्फसुकृतसंक्रमणंश्रूयतेतथापिशरीरकरा स्वेतस्यार्थवशात्स्वाम्नावःस्वापि
तइतितदनुसारेणविन्यस्यमिहिरंयांतीत्यक्तं॥कार्यनिबंधनायथा॥नाथत
दंघ्रिनखघावनतोयलग्नास्तत्कांतिलेशकणिकाजलधिंप्रविष्टा॥जाए
वतस्यमथनेनघनीभवंत्योन्नूनंसमुद्रनवनीतपदंप्रपन्नाः॥१४॥अत्र
भगवत्पादांबुजप्रक्षालनतोयरूपायांदिव्यसरित्यलक्तकरसादिवल्लभानां
तयासहसमुद्रंप्रविष्टानांतन्नखकांतिलेशकणिकानांपरिणामितयासंभा
व्यमानेनसमुद्रनवनीतपदवाच्येनचंद्रेणतेनलेनखकांत्यत्कर्षःप्रती
यते॥यथावा॥अस्याश्चरुनिसोकुमार्यमधुनाहंसस्यगर्वरत्नंसंक्रमणाय
कार्येण२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दिसाध्यस्तांपरभृतेर्वाचंयमत्वयतं॥ अंगानामकठोरत्वादिदृष्टत्वायेवसामालती
कांतिश्चेत्कमलाकिमत्रबहुनाकाषायमालंबतां॥१४९॥ अत्रनायिकागतिसोकु
मार्यादिषु वर्णनीयत्वेनप्रस्तुतेषुहंसादिगतगर्वशांत्यादिरूपाणिऔचित्येसंप्रा ८३
क्रमेण ४ व्यमानानिकार्याणिअभिहितानि॥एतानिचपूर्वोदाहरणइवनवस्तुकार्याणि
त५ किंतुतन्निरीक्षणकार्याणि॥तज्जातिरश्चांयदिचेतसिस्यादसंशयंपर्वतराज
पुत्र्याः॥तंकेशपाशंप्रसमीक्ष्यकुर्युर्वालप्रियत्वंशिथिलंचमर्यः॥१५०॥इत्यादु
दाहरणांतरेतथैवस्पष्टं॥अंगानामकठोरतेतितृतीयपादेतुवर्णनीयांगना
सोकुमार्यातिशयनिरीक्षणकार्यत्वमपिनार्थेमालतीकठोरत्वेविवक्षितं॥

42

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रतिविशेषापेक्षकठोरत्वस्यतदकार्यत्वाच्चिंतुतबुद्धेरेवइदमपित्वदंगमादर्वदृष्टमि
स्य० स्मदाहरणांतरतथैवस्पृशं॥अर्थकार्यचेदवबुद्धेःकार्यत्वेपिकार्यनिबंधनेनहीय त्वं०
निबंधना० तइत्येतादृशान्यपिकार्य[illegible]प्रस्तुतप्रशंसायामुदाहृतानिप्राचीनैः॥[illegible]
वस्तुतस्तुतदतिरेकेपिनदोषः॥नचप्रस्तुतप्रशंसायांप्रस्तुताप्रस्तुतयोःपंचवि
धएवसंबंधइतिनियंतुंशक्यतेसंबंधांतरैपितत्तद्दर्शनात्॥यथा॥तापत्रयो ५४
षधवस्यतवस्मितस्यनिश्वासमंदमरुतानिबुसीकृतस्य॥एतेकडंगरचया
इवविप्रकीर्णाजैवातृकस्यकिरणाजगतिभ्रमंति॥५५॥अत्रहयप्रस्तुतानांचं
द्रकिरणानांनगवनमंदस्मितरूपदिव्यौषधेप्रान्यविशेषकडंगरौत्सौक्ष्मेण चय०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चय

भगवन्नंदसिमतस्य तत्सारांशतारूपः कोप्युत्कर्षः प्रतीयते ॥ न चैकदंगरयोः कार्यका चान्य-
रणभावादिसंबंधोस्ति ॥ अतः सहोत्पत्त्यादिकमपि संबंधांतरमाश्रयणीयमेव ॥
वमा३ एवमुपमानोपमेयभावाश्रयतत्र कविकौशलं कार्यकारणभावनिबंधने अत्र स्तुतत्र त्पि
हंसेदशिति ॥ ततोन्यत्रापि दृश्यते ॥ यथा ॥ कालिंदि ब्रूहि कुंभोद्भवजलधिरहं
नामगल्लासिकस्मा च्चर्योर्मे नर्मदाहं त्वमपि वरदसिमे नाम कस्मात्सपत्न्याः ॥
मालिन्यं तर्हि कस्मादनुभवसि मितस्तेजलैर्मालवीनां नेत्रांभोभिः किमासां
समजनि कुपितः कुंतलक्षोणिपालः ॥ १५२ ॥ अत्र किमासां समजनीति मालव
वीनां तदारोदनस्य निमित्ते एष तत्रियमरणरूपं निमित्तमौरव्यायकुपितः कुंतल
ना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षोणिपालइतितत्कारणमभिहितमितिकारणनिबंधना॥मालवान्प्रतिप्रस्थितेन
कुंतलेश्वरेणकिंतेनिर्जितारइतिपृष्टेतद्ध्यानंतरनर्वीनर्मदाजलधिप्रस्रोत्तर
रूपंकार्यमभिहितमित्यत्रैवकार्यनिबंधनमिति॥एवंस्यात्प्रस्तुतःशब्दःभस्यामार्य
इतिप्रस्तुतांकुरैर्मेदुः॥प्रस्तुतेनप्रस्तुतस्यद्योतनेप्रस्तुतांकुरः॥किंमृगसत्यांमा
स्त्यांकृतक्याकंटकैस्तया॥२५॥अत्रप्रस्तुतेनवर्ण्यमानेनाभिमतमन्यत्प्र
स्तुतंद्योत्यतेतत्रप्रस्तुतांकुरोलंकारः॥उत्तरार्द्धमुदाहरणंइहप्रियतमेनसो
कमुद्यानेविहरंतीकाचिद्भृंगंप्रत्याहेतिवाच्यार्थस्यप्रस्तुतत्वं॥नचानामंत्र
णीयामंत्रणेवाच्यासंभवादप्रस्तुतेमेववाच्यमिहसरूपप्रस्तुतावगतयेनि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दिष्टमिति वाच्यं मोद्यादिनाभंगाद्यामंत्रणस्य लोके दर्शनात् ॥ कस्कं मो: कथयामि देव यथा १
वर हतकं मां विद्धि शाकोटकं वैराग्यादिवैक्षिसाधु विदितं कस्मादिदं कथ्यते ॥ वामेनाचव
टस्तमध्वगजनः सर्वात्मना सेवते ॥ नच्छायापि परोपकारकरणीमार्गस्थितस्यापि त ३
मे ॥ १५४ ॥ इत्यचेतनाचेतनेत्र मोत्तरवृत्तिर्यामामंत्रणस्यासंतासंभावितस्य
न५ भावात् ॥ एवं वस्तुतैवाच्यार्थेन भंगोपालंभरूपेण वक्त्रौक्त्याः कुलवचासौंदर्याभि
जन ३ मानशालिन्याः रूपपरिवृत्तिदुःखापायांपरयनितायां विटसर्वस्वापहरणसंकल्प
दुरासदायां वेश्यायां वाकंटकसंकुलीकेतकीकल्पायां प्रवर्त्तनं प्रियतमं प्रति उपालं मा २
भो योस्यते ॥ यथा वा ॥ अन्यासुप्तावदुपमर्दसहासु मृद्वोत्तलं विनोदयमर्थं सुमनो ग २
वृ ३८ नः १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लतासु ॥ बालामजातरजसं कलिकामकालेव्यर्थं कदर्थयसि किं नवमालिकायाः ॥
१५५ ॥ अत्रापि बालानामध्ये चरंतं भृंगं प्रत्ययमुपालंभ इति वाच्यार्थस्य प्रस्तुतत्वं ॥
इदं च त्रोढांगनासु बालिकारतयेक्षयति कामिश्चण्वंतिकास्याश्चिद्दिदृक्षायाः नि ३
वचनमिति तंप्रत्यपालंभो द्योत्यते ॥ यथा वा कोऽयं द्वंद्वमियं दधाति नलिनीकादंब
चंचुप्रतंचत्तचूतलतानवं किसलयं पुंस्कोकिलास्वादितं ॥ इत्याकर्ण्य मिथः स
खीजनवचः सोदीर्घिकायास्तटे चेलांतेन तिरोदधे स्तनतटं बिंबाधरं पाणिना
॥ १५५ ॥ अत्रेयमिति नलिनीव्यक्तिविशेषनिर्देशो न दीर्घिकायास्तट इत्यन
न च वाच्यार्थस्य प्रस्तुतत्वं स्पष्टं प्रस्तुतांतरं चोत्तरार्द्धमध्ये स्वयमेव कविना वि
द्योतनं ३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यां या

ष्टते॥ अत्रायोरुदाहरणयोरन्यापदेशोध्वनिमाहलोचनकारः॥ अप्रस्तुतप्रशंसायां वा

ला२ र्थोप्रस्तुतोदवर्णनीयइतितत्रापि छायामपर्यवसितायां तेनप्रस्तुतार्थव्यक्तिरलंका

रः॥ इहतुवाच्यस्यप्रस्तुतत्वेनतत्रापिछायांपर्यवसितोमर्थसौंदर्यबलेनाप्रिमतार्थव्य मा२

क्तिर्ध्वनिरेवेति॥ तदयमर्थोप्यलंकारएवनध्वनिरितिव्यवस्थापितंचित्रामीमांसायां॥

तृतीयोदाहरणस्यालंकारत्वेकस्यापिनविवादः॥ उक्तंहिध्वनिकृता॥ शब्दार्थशक्त्या

क्षिप्तोपियोर्थःकविना नैः॥ यत्राविष्कृतिपतस्योत्कर्षसा वालंसतिध्वनेरिति॥ न्यै२

पु२ एतानिसारूप्यनिबंधनान्युदाहरणानिसंबंधांतरनिबंधनान्यपिकथंचिद्व्य

ग्ययोःप्रस्तुतत्वलंनबैनोदाहरणीयानि॥ द्विजाविमुदाहीयते॥ रात्रिःशिवा

नै२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

काचनसंनिधत्तेविलोचने जागतमत्रमत्ते॥समानधर्मायुवयोः सकलैः सरवा
भविष्यसि चिरेणकुञ्चिते॥१५७॥अत्रशिवसारूप्यमिवतदेकदेशतयानध्या
प्यंललाटलोचनमेवपिंशिवरात्रिमाहात्म्यत्रयुक्तत्वेनवर्णनीयमितितन्मु
खेनकृतस्तेशिवसारूप्यंगम्यं॥यथावा॥वहंतीसिंदूरंत्रबलकबरीभारति
मिरविषांवृंदैर्बंदीकृतमिवनवीनार्ककिरणं॥तनोतुक्षेमंनस्तववदनसौ
दर्यलहरीपरीवाहस्रोतःसरणिरिवसीमंतसरणिः॥१५८॥अत्रवर्णनी
यत्वेनत्रकृतायाःसीमंतसरणेःवदनसौंदर्यपरीवाहत्वोत्प्रेक्षणेनपरिपूर्णत
टाकेपरीवाहकारणीभूतास्वस्थानेमांतीवदनसौंदर्यसमृद्धिःप्रतीयते॥

लहरी २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सापि वर्णनीयचेनप्रस्तुतेव ॥ यथा वा ॥ भंगासंगि मृणालकांडमयते भंगावलीनां
रचंनासामोक्तिकेमिंद्रनीयैत्लसरणिश्वासानिलैर्गाहते ॥ दत्तेयंहिमवालुकापिकु
व५ चयोर्यत्तेक्षणंदीपतांत सत्यः पतितांबुकरतलेधारांबुसंस्त्रीयते ॥ ५९ ॥ अत्र
रहस ह४ नायिकायाः विरहेत्वातिशयप्रकटनायसंतापवत्तत्कार्याणि मृणालमालिन्यादी
न४ न्यपि वर्णनीयत्वेविवक्षितानि ॥ तन्मुखेनसंतापोगम्यः यत्रकार्यमुखेनकारण व५
स्यावगतिरपि क्रमेनिबद्धानतत्रायमलंकारः ॥ किंत्वनुमानमेव ॥ यथा ॥ प
रिम्लानंपीनस्तनजघनसंगादुभयतस्तनोर्मध्यस्यांतःपरिमिलनमत्रायह
रितं ॥ ५३ इदंव्यस्तन्यासंप्रशिथिलभुजाक्षेपवलनैः कृशांग्याः संतापंवदतिनलि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नीपत्रशयनं ॥१५०॥ नैवस्तुतकार्यापि धानमुखेनकारणस्वगम्यत्वमपिवस्तु
तांकुरविषयत्वे किंतर्हिपर्यायोक्तमित्याकांक्षायामाह॥पर्यायोक्तंतुगम्यस्य
वचोभंग्यंतरात्रपे॥नमस्तस्मैकृतोयेनमुमुधारोहुवेधूकुचौ॥१५१॥य
त्र देवगम्यं विवक्षितंतस्यैभंग्यंतरेण विवक्षितरूपादपिचारुतरेणकेनचिद्रूपां
तरेणापिधानं पर्यायोक्तं॥उत्तरार्द्धे उदाहरणं॥अत्रभावान्वासुदेवस्वासो
पारूपेणगम्योराहुवधूकुचवैयर्थ्यकारकत्वेनरूपांतरेणसवएवाक्षिप्तः॥ हि
यथावा॥लोकंपश्यतियस्यांघ्रिःसयस्याघ्रिंनपश्यति॥ताभ्यामप्यपरिष्ठ
घाविघाविश्वगुरोस्तव॥१५२॥अत्रगोतमपतंजलिसाधारणरूपाभ्यां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पि१ योरूपांतरापत्तौ हितौ ॥ यथा वा ॥ निवेद्यतां हंत सखा पयंतो शिरीकोशाद्यदि मा
मा२ निधोनं ॥ पारो किंचद्दूरमिमो प्रयासे निधिस्तेतु छुरयं मनस्ते ॥ १५६ ॥ अत्र
किंचद्दूरं जिगमिषेति गम्य एवार्थो रूपांतरेण निहितः ॥ यथा वा ॥ देवं वंजंत्त
धिरारुधिं देवतासार्वभौमं व्यासत्रष्टा भुवनविदितो यस्य वाहाधिवाहाः ॥ ६
षामेठी भुवनमतलं पुष्करं पुष्पवाटी शाही पाल्का शातमेसुरवाश्चंदनद्रुमनो खप
भिः ॥ १५४ ॥ अत्र यस्यैव वाहाः भुजंगमा आभरणानि इत्यादि तत्तद्वाक्या
र्थव्यवस्थितौ देवत्वाद्याकारणा गम्या एव वेदादयो व्यासत्रमुखविनेयत्वा
८=२ द्याकारणा निहिताः ॥ परंतु देवतासा[illegible] स्फुटीकरणाय विशेषणविशेष्य
वर्णसौमत्वे

(यथावा)

भावव्यासेनप्रतिपादिताः॥ अलंकारसर्वस्वकृतापिपर्यायोक्तस्यसंप्रदायागतमि
दमेवलक्षणमंगीकृतं॥ गम्यस्यापि नान्यतरेणाभिधानं पर्यायोक्तमिति॥ चकाभि
धातत्रसमाज्ञयैवचकारयोराहुवधूकुचस्य॥ आलिंगनोद्दामविलासवृंद्यरतोत्स
वंचुंबनमात्रशेषमिति प्राचीनंतदुदाहरणंत्वन्यथायोजितंतराहुवधूगतनखविशि
ष्टेनरतोत्सवेनराहुशिरःछेदःकारकरूपोगम्यतइति॥ एवंचगम्यस्यापिधानमिति
लक्षणस्यानुपपत्तिमाशंक्ययकस्यतस्यैवाभिधानयोगोकार्यादिकारणाभिधान
मेवलक्षणेविवक्षितमितिलक्षणमपिक्लिष्टतयायोजितंलोचनकृतापि पर्या
योक्तंयदन्यनकारणाभिधीयतइतीदमेवलक्षणमंगीकृत्यतदुदाहरणेचका
र्यणशब्दाभिहितेनकारणेव्यंग्यंप्रदर्शनंतत्रलक्षणलक्ष्यनामेचक्लिष्टगत्यायोजि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

घ२

तं॥ वाच्यादन्येन प्रकारेण व्यंग्येनोपलक्षितं सदभिधीयते ॥ तत्सर्वायेण प्रकारांतरेण
व्यंग्येनोपलक्षितमुक्तमिति॥ सर्वोयं क्लेशः किमर्थमिति नेष्टः॥ दर्शिता निहिगम्य वि२
स्यैव रूपांतरेणाभिधाने बहून्युदाहरणानि॥ चक्राभिघातप्रसन्नाज्ञयेव तिप्राची
नोदाहरणमपि स्वरूपेण गम्यस्य भगवतो रूपांतरेणाभिधानस्यात्मयाजमेव॥
यत्तु चैरा हुशिरः शूद्रावगमनं तत्र प्रागुक्तरीत्या प्रस्तुतांकुरेण प्रस्तुते भर्चैराहाः
ना९ शिरोमात्रावशेषणे लिंगनवंध्यत्वापादनरूपे वाच्ये भगवतो रूपांतरेणोपपादि
तेन भगवतः स्वरूपेणावगमनं पर्यायोक्तस्य विषयः॥ ६०॥ पर्यायोक्तं तदप्या
हुर्यद्व्याजेनेष्टसाधनं॥ यामिचक्रतलतांदृष्टयुवाभ्यामस्यनामिह॥ ६५॥ अत्र ना
न२ यिकानायकेसंगमय्य चक्रतलतादर्शनव्याजेन निगूढं स्वस्वाभिलषितसंपा रव्यातः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५०

इनरूपेष्टसाधनंपर्यायोक्तं॥यथावा॥देहिमत्कंदुकंराधेपरिधाननिगूहितं॥इति
विस्रंसयान्नीवींतस्याःहस्तेमुदेस्तुनः॥१५५॥एवंत्रपरेष्टसाधनं॥अत्र
कंदुकसद्भावरोधिनार्थनीवीविस्रंसनव्याजेनस्वेष्टसाधनमितिभेदः॥१५४॥
उक्तिर्व्याजस्तुतिर्निंदास्तुतिभ्यांस्तुतिनिंदयोः॥कःस्वर्धुनीविवेकास्तेनय
सेपापिनोदिवं॥१५७॥साधुकृतिपुनःसाधुकर्त्तव्यंकिमतःपरं॥यन्मदर्थे
विलासिदंतैरपिनरवैरपि॥१५८॥निंदयास्तुतेःस्तुत्यानिंदयावावगम
नंव्याजस्तुतिः॥कःस्वर्धुनीस्नानहरणेविवेकोनास्तिइतिनिंदाव्याजेन
गंगासुकृतिवदेवमहापातकादिकृतवतोपिस्वर्गनयानीतितत्स्नानादिति
व्याजरूपयानिंदया

५०

CC-0.In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शयस्तुतिः॥ साधुदूतीत्युदाहरणे मदर्थमहांतं क्लेशमनुभूयैतवत्यसीति व्याजस्तु
पयास्तुयामदर्थेनगतासि किंतुरंतुमेवगतासि धिग्त्वां दूतिकाधर्तविरुद्धकारि
णीमितिनिंदावगम्यते॥ यथावा॥ कस्तेशौर्यमदोयोद्धुं चक्रेकंसमिमास्थितः॥
सप्तसप्तिसमारूढाभवंतिपरिपंथिनः॥ अत्रचंदानववैरिणागिरिजयाप्यधीरि
वस्याहृतंदेवत्वं जगतीतलेस्मरहरानावसमुन्मीलति॥ गंगासागरसंबंधा
शिकलानागाधिपः क्ष्मातलंसर्वज्ञस्यधीश्वरत्वमगमत्त्वांमांचाभि
क्षाटनं॥ ९९॥ अत्राद्योदाहरणेसप्तसोसिपदगतश्लेषमूलानिंदाव्याजेनस्तुति
र्व्यज्यते॥ द्वितीयोदाहरणेसर्वज्ञंसर्वेश्वरोसीतिज्ञस्तुत्याव्याजेरूपयाम

२२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दीयवेरूपदारिद्र्यादिसर्वंजानन्नपिबहुप्रदानेनरक्षितुंशक्तोपिमहंकिमपिनदा-
दासीतिनिंदाव्यज्यते॥सर्वमिदंनिंदास्तुत्योरेकविषयत्वेनुदाहरणं॥भिन्न
विषयत्वेनिंदयास्तुत्यभिव्यक्तिर्यथा॥कस्त्वंवानररामभवनेत्वेस्वार्थसंवा चंद्र
हकोयातःकुत्रपुरागतःसहनुमान्निर्दग्धलंकापुरः॥बद्धोराक्षससस्तुनेतिक
बहुरा:५ [illegible]संताडितस्तर्जितःसव्रीडास्तपराभवोवनमगःकुत्रेतिनज्ञायते॥२७॥
अत्रहनुमन्निंदयाइतरवानरस्तुत्यभिव्यक्तिः॥स्तुत्यानिंदाभिव्यक्तिर्यथा॥य
द्वंमुहुरीक्षसेनघनिनाक्रूषेनचाटुंमृषानेषांगर्ववचःशृणोषिनचतान्न
स्याशयोयावसि॥कात्वेशोल्कतृणानिरर्वदसिपरंनिद्रासिनिद्रागमेतन्मे
वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्रुहि कुरंगकुत्रपरवतावि नामतपंतपः ॥१७१॥ अत्र हरिणस्य
राजसेवानिर्विण्णस्यात्मनो निंदा प्रियव्यक्ता ॥ अयमप्रस्ता
तप्रशंसाविरोधइत्यलंकारसर्वस्वकारः ॥ तेन हि सार
प्यनिबंधनाप्रस्तुतप्रशंसोदाहरणांतरे वैधर्म्येणापि
दृश्यते ॥ यथा ॥ धन्याः खलु वने वाताः कंडूयंसुखशि
तलाः ॥ रामभिंदीवरश्यामं ये स्पृशंति निवारिताः ॥१७२॥
अत्र वाता धन्या इत्यप्रस्तुतार्थादहमधन्य इति वैधर्म्येणप्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्तुतोऽर्थः प्रतीयत इति व्युत्पत्तेः सादित्वं॥ इयमेवाप्रस्तुतप्रशं
सा नन्वर्थकारणादिसंबंधमनिबंधनेति॥ दंडी यदाह॥ अप्रस्तु
तप्रशंसा स्यादप्रकांडे तु या स्तुतिः॥ सुखं जिघ्रंति हरिणा
वनेषु परसेविनः॥ अर्थैरयत्नसुलभैर्जलदर्भांकुरा
दिभिः॥ सेयमप्रस्तुतैवात्र सुगव्यक्तिः प्रशस्यते॥ राज्ञा
नुवर्तनक्लेशानिर्विण्णेनमन्यस्वनेति॥ वस्तुतः स्वत्रा
पि व्याजस्तुतिरियेव युक्तं॥ स्तुत्यानिंदाभिव्यक्तिरिष्यप्रस्तुत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रशंसातोवैचित्रीविशेषसद्भावात्॥अन्यथाप्रसिद्ध्याजस्तुत्यदाहरणेष्वपिअ
प्रस्तुताभ्यांनिंदास्तुतिभ्यांप्रस्तुतेस्तुतिनिंदेगम्येते॥इत्येतावताव्याजस्तु
तिमात्रमप्रस्तुतप्रशंसास्यात्॥एवंचानयाप्रक्रिययायत्रान्यगतस्तुतिवि
वक्षयान्यस्यस्तुतिःक्रियतेतत्रव्याजस्तुतिरेव॥अन्यस्तुतिव्याजेनतदन्यस्य
स्तुतिरित्यर्थानुगमसद्भावात्॥यथा॥शिखरिणीक्वनुनामकियच्चिरंवि
मभिधानमसावकारोत्तपः॥तरुणियेनतवाधरपाटलंदशतिबिंबफलं
शुकशावकः॥१५॥अत्रशुकशावकस्तुत्यानायिकाधरसौभाग्यातिशयस्तुतिर्व्यज्यते॥निंदायानिंदयाव्यक्तिर्व्याजनिंदेतिगीयते॥विधेसनिं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

घोयस्तप्रागेकमेवाहरछिरः॥१७६॥अत्रहरनिंद्याविषमविपाकंसंसारंप्रवर्त्त
यतोविधेःनिंदाभिव्यक्तिर्व्याजेनिंदा॥यथावा॥विधिरेवविशेषगर्हणीयःकरटस्त्व
रटकस्तवापराधः॥सहकारतरोचकारयस्तेसहवासंसरलेनकोकिलेन॥
१७७॥अन्यस्तुत्यापन्यस्तुत्यभिव्यक्तिरितिपंचप्रकारव्याजस्तुतिप्रतिद्वंद्वीभू
तेयंव्याजनिंदा॥ननुयत्रान्यस्तुत्यान्यस्तुतेरन्यनिंदयाऽन्यनिंदायाश्चप्रतीतिः
स्तत्रापिव्याजस्तुतिव्याजनिंदालंकारयोरभ्युपगमेस्तुतिनिंदारूपाप्रस्तुतेत
शंसोदाहरणेषुप्रस्तुतप्रशंसानवक्तव्या॥तेषामपिव्याजस्तुतिव्याजनिंदा
यांक्रोडीकारसंभवादितिचेत्॥उच्यते॥यत्राप्रस्तुतवृत्तांतात्स्तुतिनिंदारूपा
त्तत्सरूपःप्रस्तुतवृत्तांतःप्रतीयते॥अंतःछिद्राणिसूर्यासीत्यादौतत्रलब्धायां

त्या २

ण २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वकाशासारूप्यनिबंधनाप्रस्तुतप्रशंसा ॥ यापिप्रवर्त्तमानानिवारयितुंशक्या ॥
अन्यस्तुत्यान्यस्तुतिरिन्यनिंदयान्यनिंदेयेवंव्याजस्तुतिव्याजनिंदेअपिसं
भवतश्चेत् ॥ कामंतेअपिभवंतु ॥ नत्वस्याःपरित्यागः ॥ यद्यपिविधिरेवविशे
षगर्हणीयइतिश्लोकेविधिनिंदयातन्मूलकाकनिंदयाचविशेषज्ञस्यप्रभो
स्तेनैवहृत्समतयास्थापितस्यमूर्खस्यचनिंदापतीयतइतितत्रसारूप्य पि
निबंधनाप्रस्तुतप्रशंसाप्यस्ति ॥ तथापिसेवव्याजनिंदामूलेतिप्रथमोप
स्थितासापितत्रदुर्वारा ॥ एवंचव्याजनिंदामूलकव्याजनिंदोपेयमप्रस्तु
तप्रशंसेतिचमत्कारातिशयः ॥ एवमेवव्याजस्तुतिमूलकव्याजस्तुतिरूपाप

५

५२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५४

स्तुतप्रशंसादिरूपते ॥ यथा ॥ लावण्यद्रविणं वयोनगणितः कुलोमहानर्जितः
स्वच्छंदचरतो जनस्य हृदये चिंताज्वरो निर्मितः ॥ एषापि स्वगुणानुरूपरमणा
प्राप्ता दूराकीर्हता कोर्थ्यत्तासि वयं सा विनिंदितास्तन्वीमिमां तन्वता ॥ १७ ॥
अत्र प्रस्तुतायास्तरुण्याः स्वष्टुर्निंदा व्याजेनैव सौंदर्यप्रशंसा प्रशंसनी तत्र
यत्येनैव विवक्षितायाः स्वकवितायाः कविनिंदाव्याजेन चेत्राद्यर्थ चमत्का ता ५
कवि रातिशयप्रशंसायां पर्यवस्यति ॥ अस्य श्लोकस्य वाच्यार्थ विषयेयद्यपि ना
र्थ ३ यंतसामंजस्यं ॥ नहि विकल्पावीतरागस्यति विकल्पयितुं शक्यं तस्मान
नुगुणत्वात् ॥ वीतरागे हि सर्वे विधा विषयेषु प्रवृत्तश्च ॥ नापि रागिणइ

५४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदीय २ ति २ ता २ रुचि २

त्रियु ज्यतैविकल्पषु वराकीरूपोक्तिं गितस्य हतेस्यमंगलोपहितस्य च वचसो तत्वात्॥
तुल्यरमणाभावादिस्यस्यायंतमनुचितत्वाच्च॥ स्वात्मनि तदनुरूपरूपासंभावना एवार
वीतत्र यामपि रागित्वे हि पश्चुप्रायतौ तथापि विवक्षितप्रस्तुतार्थपरतायां न किंचिदसात्
जस्यं॥ अत एवास्य श्लोकस्य प्रस्तुतप्रशंसापरत्वमुक्तं प्राचीनैः॥ वाच्यासंभव
पि अप्रस्तुतप्रशंसोपपत्तेरिति॥ आक्षेपः स्वयमुक्तस्य प्रतिषेधो विचारणात्॥
चंद्रसंदर्शयात्मानमथवा स्त्रियामुख॥ १७१॥ अत्र बाधितस्य चंद्रदर्शनस्य
त्रियामुखसत्वेन कैमर्थक्यं विचार्यार्थवेत्यादिना सूचितः॥ यथा वा॥ साहित्य
पाथोनिधिमंथनोत्थं कर्णामृतं रक्षत हे कवींद्राः॥ यत्तस्य देत्याइव लुंठनायका
काव्यः १ प्रतिषेधं आक्षेपः २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नी२ पि१

व्यार्थचोराःत्रकटीभवंति ॥१८॥ गृहंतुसर्वंयदिवायथेच्छुनास्तिक्षतिंकापि
कस्यचराणां ॥ रत्नेषुलुप्तेषुबहुष्वमर्त्यैरद्यापिरत्नाकरएवसिंधुः ॥१९॥ व२
अत्रौषधमुक्तेकेनचार्थितस्यकाव्यार्थचोरेन्योरक्षणस्यस्वाहिरिवित
वैचित्र्याणां समुद्रातिरत्नजालवदक्षयत्वंविचिंत्यनिषेधआक्षेपः ॥ निषे
धाभासआक्षेपंबुधाःकेचनमन्वते ॥ नाहंदूतीतनोस्तापस्तस्याःकालान
लोपमः ॥१८२॥ केचिदलंकारसर्वस्वकारादयइदमाहुः ॥ ननिषेधमात्र
माक्षेपः ॥ यथा ॥ दूत्याउक्तोनाहंदूतीतिनिषेधोबाधितत्वादाभासरूपः ॥
संगमकालोचितकेतत्वचनपरिहारेणयथार्थवादित्वेपर्यवस्यन्तिदानी
× किंतुयोनिषेधोबाधितःसन्अर्थांतरपर्यवसितःकश्चिद्विशेषमाक्षिपतिसआक्षेपः ॥२

५५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मेघागस्यनायिकोज्जिवनीयेतिविरोषमाक्षिपति॥ यथावा॥ नरेंद्रमौलेनवयंतव
संदेशहारिणः॥ जगत्कुटुंबिनस्तेभ्यनराचुःकस्यदीक्ष्यते॥१८॥ अत्रसंदेश
हारिणामुक्तोनवयंसंदेशहारिणइतिनिषेधोनुपपन्नः॥ संधिकालोचितक
तवचनपरिहारणयथार्थवादित्वेपर्यवस्यन्सर्वजगतीपालकस्यतवनक
श्चिदपिराचुभावोनालोकनीयः॥ किंतुसर्वेराजानोभ्रसमावेनसंरक्षणीय
इतिविरोषमाक्षिपति॥ आक्षेपोन्यविधोव्यक्तेनिषेध्येचतिरोहिते॥ गच्छग
च्छसिचेत्कांततत्रेवस्याज्जनिर्मम॥१९४॥ गच्छतिविधिर्व्यक्तः मागाइति
निषेधस्तिरोहितः कांतोद्देशंदेशनिजजनमप्रार्थनयास्वमरणसूचनेवा
स्याः॥

दिष्टः॥

अत्र२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नगमनेहृतः॥यथावा॥नचिरंममतापायतवयात्राभविष्यति॥यदियास्यसियातव्य
मल्पमाशंकयाव्रते॥१८५॥अत्रापिनचिरंममतापायतिस्वमरणसंसूचनेनग
मननिषेधोगर्भितः॥लाभासत्वेविरोधस्यविरोधाभासइष्यते॥विनापित्तास्वि
हारेणवक्षोजौतवहारिणौ॥१८६॥अत्रहाररहितावपिहारिणौहृद्यावितिश्लेष
मूलोविरोधाभासः॥यथावा॥अतीपक्षपरिक्षीणकिंततोक्षियाविरुद्धधर्मेरपिते ५५
स्ततोक्षिता॥अमित्रजिन्मित्रजिदोजसासयद्विचारदूरुचारदूराप्यवर्त्तत॥१८७॥
अत्रविरोधसमाधानोत्प्रेक्षासिरस्कोविरोधाभासइतिपूर्वस्माद्भेदः॥विनाप्यव
नाविनापिस्यात्कारणंकार्यजन्मचेत्॥अप्यलाक्षारसासिक्तरक्तंचचरणद्वयं॥१८८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अत्रत्ताक्षारसेकरूपकारणाभावेपिरक्तिमाकथितः॥स्वाभाविकत्वेनविरो
तर धपरिहारः॥यथावा॥अपीक्षीबकादेबमसमस्थामलांबरं॥अत्रसादितुसक्षा
पाऽ बुजगदासीनमनोहरं॥१९॥अत्रापिनादिप्रसिद्धत्वभावेपिक्षीबत्वादि
निबद्धंविभाव्यमानशारत्समयहेतुकत्वेनविरोधपरिहारः॥यथावा॥
वरतनुकबरीविभाविनासुरभिनरवेनेनारंद्रपाणिना॥अपचितकुसुमापि
बल्लरीसमेजनिहंतविलीनषट्पदा॥१९०॥अत्रवर्ध्यापुष्पाभावेपिभृंगल
गनंनिबद्धं॥तत्रवरतनुकबरीसंक्रांतसौरभनरपतिनखसंसर्गरूपंहे
त्वंतरंविशेषणमुखेनदर्शितमितिविरोधपरिहारः॥हेतुनामसमग्रत्वेका

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्यप्तिश्च सामुत्ता॥ अस्त्रैरतीक्ष्णकठिनैर्जगज्जयति मन्मथः॥१९॥ अत्र जग
ज्जये साध्ये हेतुनां स्त्राणामसमग्रत्वं तीक्ष्णत्वादिगुणवैकल्यं॥ यथा वा॥ छद्या
नमारुतोद्धूताश्च्युतचंपकरेणवः॥ उत्स्वयंति पांथानामस्पृशंतोपि लोचने॥१२॥
अत्र बाष्पोद्गमनहेतूनां रेणूनामसमग्रत्वं स्पर्शनक्रियावैकल्यं॥ इमौ वि
शेषोक्तिमितिदंडी यौ जहार॥ प्रथमोदाहरणे मन्मथस्य महिमातिशयरू
पो द्वितीयोदाहरणे चंपकरेणूनामुद्दीपकत्वातिशयरूपश्च विशेषः॥ स्वाभावपि
त इति॥ अस्मो भिस्तु तीक्ष्णत्वादिवैकल्यमिति कारणविशेषाभावरूप
मिति विभावनात्र दर्शिता॥ कार्योत्पत्तिस्तृतीयास्याः सस्यपि प्रतिबंधके॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नरेंद्रानेवतेराजन्दशास्यसि सुजंगमः॥१९२॥अथनरेंद्रविषवेद्याः सविषप्र
तिबंधकमंत्रौषधशक्तिनः श्लेषणगृहीताइति॥सस्यवप्रतिबंधके कार्योत्प
त्तिः॥यथावा॥चित्रंवपतिराजेंद्रप्रतापतपनस्तव॥अनातपत्रमुत्सृज्यसा
तपत्रंविधरूणी॥१९४॥अथ कारणात्कार्यजन्म चतुर्थी स्याद्विभावना॥तूं
रवाद्विनीनिनादायसुदेतिमहदद्भुतं॥१९५॥अत्रशंखत्वेनकामिनीकंठंत
त्रीनिनादत्वेनतद्गीतंचाध्यवसीयतइत्यकारणात्कार्यजन्म॥विरुद्धकार्यसंप
त्तिर्दशाकविद्विभावना॥सितांशुकिरणास्तन्वींहंतसंतापयंतितां॥१९६॥
अत्रतापनिवर्त्तकतयातापविरुद्धेरिंदुकिरणैस्तापजनिरुक्ता॥यथावा॥
यथावातिलपुष्पासमायातिवापुश्चंदनसौरभः॥इंदीवरयुगाच्चित्रंनिःसरंतिशिली
मुखाः॥१९६॥३

५२

56

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५

उद्रेति कुमारसूर्यकुवलयमुद्भासति नातिमत्रं ॥ मुकुलीभवंति चित्रं परराजकु
यथावा ॥ २ मारपाणिपद्मानि ॥ १९७ ॥ अविवेकि कुचद्वंद्वं तु नाम जगत्त्रयं ॥ श्रुतिभूषण
यिनोरश्चोरयुक्तं जनमारणं ॥ १९८ ॥ पूर्वो दाहरणयोः कारणस्य कार्यविरो
धित्वं स्वाभाविकमिह श्रुतिभूषणयिचरूपागंतुकगुणत्रयुक्तमिति भेदः ॥ कार्या
कारणजन्मापि दृष्टा काचिद्विभावना ॥ यशःपयोराशिरभूत्सुरकल्पतरोस्त
व ॥ १९९ ॥ यथावा ॥ जातान्तता तुरोलजातुलतायां न जायते रोलः ॥ संभति
न द्विपरीतं कन्कलतायां गिरिद्वयं जातं ॥ २०० ॥ कार्याजनिर्विशेषोक्तिः स
निपुष्कलकारणे हृदि स्नेहक्षयान्नाभूत्स्मरदीपे ज्वलत्यपि ॥ १ ॥ यथावा ॥ अ
नुरागवती संध्या दिवसस्तत्पुरःसरः ॥ अहो देवगतिश्चित्रा तथापि न समागमः ॥ २ ॥

५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

असंभवोऽर्थनिष्पत्तेरसंभाव्यत्ववर्णनं ॥ कोवेद गोपतिश्चुक्रः शोलमुत्पादयेद्यदिति
॥ ३ ॥ यथा वा अयं वारामेको नियंत्रेद्रत्नाकर इति श्रुतोस्मा भिस्तत्स्मातर
लितमनोभिर्जलनिधिः ॥ कएव जानीते निजकरपुटीकोटरगतं क्षणादेनं ता
प्यत्तिमिव करमार्पयति मुनिः ॥ ४ ॥ विरुद्धं भिन्नदेशत्वं कार्यहेत्वोरसंगति ॥
विषं जलधरः पीतं मूर्छिताः पथिकांगनाः ॥ ५ ॥ ययोः कार्यहेत्वोर्भिन्नदेश
त्वं तयोस्तन्निबध्यमानमसंगत्वलंकारः ॥ यथा विषपानमूर्छयोर्भिन्नदेश
त्वं ॥ यथा वा ॥ अहो खलु भुजंगस्य चित्रोयं वधक्रमः ॥ अन्यस्य दशति श्री
त्रमन्यः प्राणैर्विमुच्यते ॥ ६ ॥ क्वचिदसांगत्यसमाधाननिबंधनेन चारुतातिं

विरुद्धं

वि २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शायः॥ यथा॥ अजस्यमारोहसि दूरदीर्घिकां संकल्प सोपानततिं तदीयां॥ श्वा
सौसवर्षस्यधिकं पुनर्यध्यानात्तवत्वमयथा तामवाप॥ ७॥ विरुद्धमिति विशे
षणाद्यत्र कार्यहेत्वोर्भिन्नदेशत्वं न विरुद्धं तत्र नासंगतिः॥ यथा॥ भ्रूचापवल्ली
सुमुखीयावन्नयति वक्रतां॥ तावत्कटाक्षविशिखैर्वितिघ्नते हृदयं मम॥ ८॥ अ
न्यत्र करणीयस्य ततोन्यत्र कृतिश्चसा॥ अन्यत्कर्तुं प्रवृत्तस्य तद्विरुद्धा तिस्त
था॥ ९॥ अपरिजातां वसुधां चिकीर्षत्यौ तथा कृथाः॥ गोचोद्धारत्वमो पिगो
त्रोद्धरं पुराकरोः॥ १०॥ अत्र कृष्णं प्रति शक्रस्य सोपालंभवचने भुवि चिकीर्षि
तत्वात्तत्र करणीयमपरिजातत्वं दिविकृतमिस्येषा संगतिः॥ पुरा गोत्रोद्धारं

न्यां ३८ या ३९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णां

षट्चेनवराहरूपेणतिद्विरूढंगोत्रोदलनंखुरकुट्टनैःकृतमितिद्वितीया॥द्विविधापि
श्लेषोत्थापिता॥यथावा॥चलवद्भ्रुवंडितसपलचित्तासिनीनांभूषाभत्यापि बं२
नवाभुवनेकवीर॥नेत्रेषुकंकेणमथोरुषुपत्रवल्लीचालेद्रसिंहतिलकंकर
पल्लवेषु॥१५॥मोहंजगत्त्रयभुवामपनेतुमेतदादायिरूपमरिवक्रेश्वरदेहभा
म ताम्॥निःसीकांतिरसनीरधिनामुनेवमोहंश्रयद्भयसिमुग्धविलोचनीनां॥१६॥
अत्रायोदाहरणेकंकणादीनामन्यत्रकर्त्तव्यत्वंत्रसिद्धमितिनोपन्यस्तंभव
ति॥नाभावनारूपाअन्यत्रकृतिराक्षिप्यइतिलक्षणानुगतिः॥विषमंवर्ण्यतेयत्र
८२ घटनाननुरूपयोः॥क्वेयंशिरीषमृदुगीकृताङ्गमदनज्वरः॥१७॥अत्रातिमृदुत्व
नातिदुःसहत्वंचानुरूपयोःअंगनामदनज्वरयोःघटना॥यथावा॥अनिले

न२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षसि यदेंदोर्वक्त्रलक्ष्मीमगाक्ष्याः पुनरपि सकृदब्योमज्ञसंक्षालयांकिं ॥ सुविम
य२ लमयबिंबपारिजातप्रसूनैः सुरमवदनोचेत्वंकतस्यामुखंक्व ॥१४॥ पर्वत्रवस्तु
सूतिघटना ॥ अत्र चंद्रवदनलक्ष्म्योस्तर्किताघटनेतिभेदः ॥ विरूपकार्यस्यो
त्पत्तिरपरं विषमंमतं ॥ कीर्तिस्तेयवलांस्यामृतचक्रपाणिका ॥१५॥ अत्रका
ण५ रणगुणक्रमैर्विरुद्धाछामाद्भवलोत्पत्तिः ॥ कार्यकारणयोः निर्वर्त्यनिवर्तकत्वन
पंचमीविभावना ॥ विलक्षणगुणरागतिस्त्वेतदिदं विषमभिति भेदः ॥ अनिष्टस्याप्य
वाप्तिश्चतदिष्टार्थसमुद्यमात् ॥ नक्ष्यांशयोहिमंजूषांदृष्ट्वास्वस्तनमक्षितः ॥
१५ ॥ इष्टार्थमुद्दिश्य किंचित्कर्मारभ्यवतस्तत्तोनकेवलमिष्टस्यानवाप्तिः ॥ किं
तुततएवानिष्टस्यापिप्रतिलंभश्चतदपिविषमं ॥ यथानक्ष्यत्रप्रयासर्पपेटिका

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दृष्ट्वा प्रविष्टस्य मूषकस्य न केवलं भक्ष्याद्धानिः किंतु स्वरूपहानिरपि ॥ यथा वा ॥ गोपा
लइति कृष्णस्य चुरक्षीरवांछया ॥ श्रितो मातुस्तनं क्षीरमलभ्यं तत्यथा कृतं ॥ १७ ॥
